# श्रीमद् भागवत रसिक कुटुंब

# श्रीराधा षोडश नामावली स्तोत्रम्

**राधा रासेश्वरी रास- वासिनी रसिकेश्वरी ।**

**कृष्णप्राणाधिका कृष्ण- प्रिया कृष्णस्वरूपिणी ॥ 1॥**

**कृष्णवामाङ्गसम्भूता, परमानन्दरूपिणी ।**

**कृष्णा वृन्दावनी वृन्दा, वृन्दावनविनोदिनी ॥ 2॥**

**चन्द्रावली चन्द्रकान्ता, शरच्चन्द्रप्रभानना ।**

**नामान्येतानि साराणि, तेषामभ्यन्तराणि च ॥ 3॥**

**राधेत्येवं(ञ्) च सं(म्)सिद्धौ, राकारो दानवाचकः।**

**स्वयं(न्) निर्वाणदात्री या, सा राधा परिकीर्तिता ॥ 4॥**

**रासेश्वरस्य पत्नीयं(न्), तेन रासेश्वरी स्मृता ।**

**रासे च वासो यस्याश्च, तेन सा रासवासिनी ॥ 5॥**

सर्वासां(म्) रसिकानां(ञ्) च, देवीनामीश्वरी परा ।
प्रवदन्ति पुरा सन्तस्- तेन तां(म्) रसिकेश्वरीम् ॥ 6॥

प्राणाधिका प्रेयसी सा, कृष्णस्य परमात्मनः ।
कृष्णप्राणाधिका सा च, कृष्णेन परिकीर्तिता ॥ 7॥

कृष्णस्यातिप्रिया कान्ता, कृष्णो वास्याः(फ्) प्रियः(स्) सदा ।
सर्वैर्देवगणैरुक्ता, तेन कृष्णप्रिया स्मृता ॥ 8॥

कृष्णरूपं(म्) सं(न्)निधातुं(यँ) , या शक्ता चावलीलया ।
सर्वां(म्)शैः(ख्) कृष्णसदृशी, तेन कृष्णस्वरूपिणी ॥ 9॥

वामाङ्गार्द्धेन कृष्णस्य, या सम्भूता परा सती ।
कृष्णवामाङ्गसम्भूता, तेन कृष्णेन कीर्तिता ॥ 10॥

परमानन्दराशिश्च, स्वयं(म्) मूर्तिमती सती ।
श्रुतिभिः(ख्) कीर्तिता तेन, परमानन्दरूपिणी ॥ 11॥

कृषिर्मोक्षार्थवचनो, ण एवोत्कृष्टवाचकः ।
आकारो दातृवचनस्- तेन कृष्णा प्रकीर्तिता ॥ 12॥

अस्ति वृन्दावनं(यँ) यस्यास्- तेन वृन्दावती स्मृता ।

वृन्दावनस्याधिदेवी, तेन वाथ प्रकीर्तिता ॥ 13॥

सङ्घः(स्) सखीनां(वँ) वृन्दः(स्) स्या- दकारोऽप्यस्तिवाचकः ।

सखिवृन्दोऽस्ति यस्याश्च, सा वृन्दा परिकीर्तिता ॥ 14॥

वृन्दावने विनोदश्च, सोऽस्या ह्यस्ति च तत्र वै ।

वेदा वदन्ति तां(न्) तेन, वृन्दावनविनोदिनीम् ॥ 15॥

नखचन्द्रावलीवक्त्र- चन्द्रोऽस्ति यत्र सं(न्)ततम् ।

तेन चन्द्रावली सा च, कृष्णेन परिकीर्तिता ॥ 16॥

कान्तिरस्ति चन्द्रतुल्या, सदा यस्या दिवानिशम् ।

मुनिना कीर्तिता तेन, शरच्चन्द्रप्रभानना ॥ 17॥

## फलश्रुति

इदं(म्) षोडशनामोक्त- मर्थव्याख्यानसं(यँ)युतम् ।

नारायणेन यद्दत्तं(म्), ब्रह्मणे नाभिपङ्कजे ॥ 18॥

ब्रह्मणा च पुरा दत्तं(न्), धर्माय जनकाय मे ।

धर्मेण कृपया दत्तं(म्), मह्यमादित्यपर्वणि ।

पुष्करे च महातीर्थे पुण्याहे देवसं(म्)सदि ॥ 19॥

राधाप्रभावप्रस्तावे, सुप्रसन्नेन चेतसा ।

इदं(म्) स्तोत्रं(म्) महापुण्यं(न्), तुभ्यं(न्) दत्तं(म्) मया मुने ॥ 20॥

निन्दकायावैष्णवाय , न दातव्यं(म्) महामुने ।

यावज्जीवमिदं(म्) स्तोत्रं(न्) त्रिसन्ध्यं(यँ) यः(फ्) पठेन्नरः ॥ 21॥

राधामाधवयोः(फ्) पाद- पद्मे भक्तिर्भवेदिह ।

अन्ते लभेत्तयोर्दास्यं(म्) , शश्वत्सहचरो भवेत् ॥ 22॥

अणिमादिकसिद्धिं(ञ्) च, सं(म्)प्राप्य नित्यविग्रहम् ।

व्रतदानोपवासैश्च, सर्वैर्नियमपूर्वकैः ॥ 23॥

चतुर्णां(ञ्) चैव वेदानां(म्), पाठः(स्) सर्वार्थसं(यँ)युतैः।

सर्वेषां(यँ) यज्ञतीर्थानां(ङ्), करणैर्विधिबोधितैः ॥ 24॥

प्रदक्षिणेन भूमेश्च, कृत्स्नाया एव सप्तधा ।

शरणागतरक्षाया- मज्ञानां(ञ्) ज्ञानदानतः ॥ 25॥

देवानां(वँ) वैष्णवानां(ञ्) च , दर्शनेनापि यत् फलम् ।

तदेव स्तोत्रपाठस्य , कलां(न्) नार्हति षोडशीम् ।

स्तोत्रस्यास्य प्रभावेण, जीवन्मुक्तो भवेन्नरः ॥ 26॥

॥ इति  श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे

श्रीनारायणकृतम् राधाषोडशनामस्तोत्रम् सम्पूर्णम् ॥